# जनयित्री

# JANAYITRĪ

## मातृतत्त्वाधारितं पुस्तकम्

*(A Book based on the Concept of Mother)*

मातृदेवो भव



(Let us treat our mothers like a Goddess)

सम्पादकः

**डॉ. गगनचन्द्रदे**

तिलोत्तमास्मृतिपरिषद

चिरकुला, कमर्द्दा, बालेश्वरम्, ओडिशा-७५६०७९

| क्रमाङ्कः | कीर्तिः | स्रष्टा / स्रष्ट्री | पृष्ठाङ्कः |
|---|---|---|---|
| | **पद्यविभागः** | | |
| ३. | भारत-जननी-वात्सल्यम् | प्रो. (डॉ.) हरेकृष्णशतपथी | ४३ |
| ४. | मातृस्तवनाञ्जलिः | प्रो. (डॉ.) बनमालीबिश्वालः | ५२ |
| ५. | मातातिरिक्ता भुवि गौरवेण | प्रो. (डॉ.) कमलेशमिश्रः | ५४ |
| ६. | मातृविंशतिका | प्रो. (डॉ.) भागीरथिनन्दः | ५५ |
| ७. | सा वन्दनीया भुवि मातृजातिः | वाणीरत्नपण्डितश्रीगदाधरदाशः | ५७ |
| ८. | मातृपञ्चकम् | डॉ. ब्रजकिशोरत्रिपाठी | ६१ |
| ९. | माता महीयसी पूज्या | डॉ. सतीशचन्द्रपण्डा | ६२ |
| १०. | माता समेड्या मनुजैस्सदा तत् | डॉ. बुद्धेश्वरषडङ्गी | ६३ |
| ११. | मातृस्मृतिः | डॉ. पूर्णचन्द्र उपाध्यायः | ६५ |
| १२. | जननी सा गरीयसी | डॉ. सोमनाथदाशः | ६६ |
| १३. | मातृस्तवः | डॉ. प्रियव्रतमिश्रः | ६८ |
| १४. | मातृषट्पदी | डॉ. हरेकृष्णपट्टजोषी | ६९ |
| १५. | मातृरूपिणीम् | प्रो. (डॉ.) गौरप्रियादाशः | ७० |
| १६. | महीयसी विष्णुप्रिया | डॉ. कालीप्रसादमिश्रः | ७२ |
| १७. | जननी | डॉ. धर्मेन्द्रकुमारसिंहदेओ | ७४ |
| १८. | मातृकृपा गरीयसी | डॉ. मनोरञ्जनदासः | ७५ |
| १९. | जननी | श्रीमान् सैकतमोहान्तः | ७७ |
| | **गद्यविभागः** | | |
| २०. | मातृशक्तिः | प्रो. (डॉ.) ब्रजकिशोरस्वाईं | ७८ |
| २१. | मातृमहिमा | डॉ. निरञ्जनसाहुः | ८० |
| २२. | मातुः महत्त्वम् | प्रो. (डॉ.) विष्णुपदमहापात्रः | ८३ |
| २३. | नास्ति मातृसमोगुरुः | डॉ. विवेकानन्दसाहुः | ८६ |
| २४. | भारतायनमहाकाव्ये मातृगौरवम् | प्रो. सत्यनारायण आचार्यः | ९० |
| २५. | भारतीयसंस्कृतौ नारीणां वैशिष्ट्यम् | डॉ. केशवचन्द्रमहापात्रः | ९४ |
| २६. | श्रीचर्च्चिकारहस्यम् | डॉ. कालीप्रसन्नशतपथी | ९९ |
| २७. | मातृदेवो भव | प्रो. (डॉ.) सुशान्तकुमारराजः | ११० |
| २८. | मातृमहिमा | डॉ. नारायणदाशः | ११६ |
| २९. | मातृशक्तिः | डॉ. उमेशचन्द्रमिश्रः | १२१ |
| ३०. | जननी जन्मभूमिश्च स्वर्गादपि गरीयसी | डॉ. भारतभूषणरथः | १२५ |



# मातृकृपा गरीयसी

डॉ. मनोरञ्जनदासः
सहाचार्यः संस्कृतविभागमुख्यश्च
मुगवेडियागंगाधरमहाविद्यालयः, पूर्वमेदिनीपुरम्, पश्चिमवङ्गः

सर्वदा दृश्यते शास्त्रे मातृकृपा गरीयसी ।
मातृकृपां समाश्रित्य मूर्खा भवन्ति पण्डिताः ।।१

संस्कृतबाङ्मयाकाशे यः खलु चिरवन्दितः ।
वाग्देव्याः वरपुत्रोऽसौ कालिदास इति श्रुतः ।।२

कालिदासं महामूर्खं वदन्ति विश्ववासिनः ।
सरस्वत्याः प्रसादेन विश्वकविषु पूजितः ।।३

आजन्म यो महामूर्खः शास्त्रज्ञाने च दुर्बलः ।
उवाच सारलादासः स्वकण्ठेन पुनः पुनः ।।४

स्वप्नेन सारलादेवी यदुवाच कविं प्रति ।
लिखितं निष्ठया साकं कविवरेण सत्वरम् ।।५

मातृकृपां समाश्रित्य यश्च ख्यातो युगे युगे ।
महाभारतमाश्रित्य उत्कलेषु प्रतिष्ठितः ।।६

'टेरेसा' जननी ख्याता सेवाकार्ये हि भारते ।
गान्धारी जननी धन्या मातृत्वधर्मपालने ।।७

रामेण पूजिता देवी रामायणे च लक्ष्यते ।
रावणस्य विनाशाय अम्बिकापूजनं यथा ।।८

लक्ष्मीं त्यक्त्वा जगन्नाथो बहु कष्टं च लब्धवान् ।
भिक्षावृत्तिं स्वयं कृत्वा दृष्टान्तः स्थापितः खलु ।।९

आद्याशक्तिर्महामाया काकटपुरमङ्गला ।
मनसा विमला चण्डी स्वमहिम्ना प्रतिष्ठिता ।।१०

कुपुत्रो जायेत नित्यं कुमाता न भवेत् कदा ।
सर्वतीर्थमयी माता मातृकृपा गरीयसी ।।११

दिवारात्रं समं कृत्वा स्वात्मानं या निवेदिता ।
प्रणम्या सा च सर्वादौ जननी गर्भधारिणी ।।१२

यस्या वचनमाकर्ण्य वयं सर्वे प्रतिष्ठिताः ।
नमस्तस्यै नमस्तस्यै गभीरहृत्प्रदेशतः ।।१३

निधाय हृदि सन्तापं परिवाराय चिन्तिता ।
सुधावाक्यप्रदानेन सदैव या क्रियान्विता ।।१४

विपदि या स्थितप्रज्ञा सम्पदि विगतस्पृहा ।
आदर्शजननी सा च यद्वचनं सुधाधिकम् ।।१५

कुटुम्बतोषणे या च पारङ्गमेति कथ्यते ।
पतिपरायणा नित्यं सहिष्णुताप्रदायिनी ।।१६